नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 07

**VU–87–Sahit. Shas.**

# वरिष्ठ उपाध्याय परीक्षा, 2018

## साहित्य – शास्त्रम्

**समय** : 3¼ **होरा:**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभि : सर्वप्रथमं स्वप्रश्नपत्रे निर्धारित स्थाने नामांकः अनिवार्यतो लेखनीयः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तर पुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।

5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) ‘कारणे सति कार्यस्य अनुपत्तिः’ इत्यत्र कोऽलङ्कारो भवति। [1]

2) वक्रोक्ति–अलंकारस्य लक्षणं लिखत। [1]

3) विवक्षितवाच्यध्वनिः कतिविधोभवति? [1]

4) असंलक्ष्यक्रमव्यङ्ग्यध्वनौ केषामन्तर्भावो भवति? [1]

5) चन्द्रालोके लक्षणा कस्मिन् मयूखे वर्णिता? [1]

6) निर्दिष्ट–शब्दानाम् अर्थबोधः कया वृत्त्या भवति? [1]

7) जह्नोः कन्या का आसीत्। [1]

8) रन्तिदेवस्य कीर्तिरूपा का नदी वर्णिता? [1]

9) प्रतिमागृहे केषां प्रतिमाः स्थापिताः आसन्? [1]

10) कैकेयी रामस्य कृते कति वर्षाणां वनवासम् इष्टवती ? [1]

11) प्रोढावृत्तिं निरूपयत। [2]

12) रसाभासं भावाभासञ्च वर्णयत। [2]

13) अपराङ्गगुणीभूतव्यङ्ग्यं सोदाहरणं विवेचयत। [2]

14) अभिधा–भेदाः नामतो गणनीयाः। [2]

15) रामगिरिपर्वतस्य महत्वं प्रतिपादनीयम्। [2]

16) 'मेघदूतस्य' नामकरणस्य किं प्रयोजनम्। [2]

17) महाकविभासस्य नाटकानां नामानि लेखनीयानि। [2]

18) न व्याघ्रं मृगशिशवः प्रधर्षयन्ति। इति सूक्तेः सप्रसङ्गो भावार्थो लेखनीयः। [1+1=2]

19) अधोलिखितालंकारयुग्मेषु कयोश्चिद् द्वयोः परस्परं भेदः प्रदर्शनीयः – [2+2=4]

क) दृष्टान्तः – दीपकम्

ख) अप्रस्तुतप्रशंसा – व्याजस्तुतिः

ग) निदर्शना – समासोक्तिः

20) अधोलिखितेषु द्वयो रूदाहरणयोः अंलकारौ परिचीय तयोः लक्षणोल्लेखपूर्वकं संगतिर्विधेया –[2+2=4]

क) 'शैला इवोन्नताः सन्तः किन्तु प्रकृति कोमलाः'

ख) 'हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्'

ग) 'कुरंगैरूत्तरङ्गाक्षि स्तब्धकर्णैरूदीक्ष्यते।'

21) अविवक्षितवाच्यध्वनिः सोदाहरणं विवेचनीयः। [4]

22) अस्फुटगुणीभूतव्यङ्ग्यम् अगूढगुणीभूतव्यङ्ग्यञ्च सोदाहरणं विवेचयत। [4]

23) लक्षणायाः स्वरूपं प्रतिपाद्य तत्र प्रयोजक सम्बन्धान् प्रदर्शयत। [4]

24) मेघस्य मार्गे स्थितपर्वतनदी वर्णनं स्वशब्देषु प्रतिपादनीयम्। [4]

25) अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सप्रसङ्गो भावार्थो लेखनीयः [1+3=4]

क) धूमज्योतिः सलिलमरूतां सन्निपातः क्व मेघः

सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।

इत्यौत्सुक्याद परिगणयन् गुह्यकस्तं ययाचे,

कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

ख) वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः

पाण्डुच्छाया तटरूहतरूभ्रंशिभिर्जीर्ण पर्णैः।

सौभाग्यं ते सुभग! विरहाऽवस्थया व्यञ्जयन्ति,

कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः।।

26) प्रतिमानाटकस्य तृतीयाङ्कस्य कथासारो लेखनीयः। [4]

27) अधोलिखित पद्ययोः कस्यचिदेकस्य छन्दः परिचीय तल्लक्षणं लेखनीयम्। लक्षणोदाहरणयोः संगतिश्च प्रदर्शनीया – [2+2=4]

क) असुरसमरद क्षैर्वज्रसंघृष्ट चापै –

रनुपमबलवीर्यैः स्वः कुलैस्तुल्यवीर्यः।

रघुरिव स नरेन्द्रो यज्ञविश्रान्त कोशो,

भव जगति गुणानां भाजनं भ्राजितानाम्।।

ख) गत्वा पूर्वं स्वसैन्यैरभिसरिसमये खं समानैर्विमानै –

विख्याते यो विमर्दे स स इति बहुशः सासुराणां सुराणाम्।

स श्रीमांस्त्यक्तदेहो दयितमपि विना स्नेहवन्तं भवन्तं,

स्वर्गस्थः साम्प्रतं किं रमयति पितृभिः स्वैर्नरेन्द्रैर्नरेन्द्रः

28) रसस्वरूपं विविच्य शान्तरसस्य लक्षणोदाहरणं प्रदर्शयत। **[6]**

अथवा

करूणवीररसयोः लक्षणोदाहरणं विवेचयत।

29) अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया –**[1+1+1+3=6]**

क) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां

वामश्चायं नदति मधुरं चातकस्ते सगन्धः।

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः,

सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।।

ख) भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः

पुण्यं यायास्त्रिभुवन गुरो र्धाम चण्डीश्वरस्य।

धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या –

स्तोयक्रीडानिरत युवतिस्नानतिक्तैर्मरूद्भिः।।

30) अधोलिखितपद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया –[1+1+1+3=6]

क) छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं

न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बु पूर्णाः घटाः।

युक्तः पुष्यरथश्च मन्त्रिसहिताः पौराः समभ्यागताः

सर्वस्यास्य हि मङ्गलं स भगवान् वेद्यां वसिष्ठः स्थितः।।

ख) क्व ते ज्येष्ठो रामः प्रियसुत! सुतः सा क्व दुहिता

विदेहानां भर्तुर्निरतिशय भक्ति गुरूजने।

क्व वा सौमित्रिर्मां हतपितृकमासन्नमरणं

किमप्याहुः किं ते सकलजनशोकार्णवकरम्।।

✈ ✈ ✈

DO NOT WRITE ANYTHING HERE